अद्वैतवेदान्ते कर्मोपासने

Dr. Sreejith T.G.

आत्यन्तिकं सुखमिच्छन्ति मानवाः। यद्यपि नास्ति श्रद्धा उपाये तथापि उपैये ब्रह्मण्यस्ति। सुखमिदं शाश्वतमलौकिकं निर्विषयकञ्च, अत एव तदवाप्त्युपायः अज्ञातज्ञापकाच्छास्त्रात् ज्ञेयः। सर्वैरप्यनुभूयमानस्य सुखोपलब्धिप्रतिबन्धकभूतस्य दुःखहेतुभूतानाद्यविद्याप्रयुक्ताध्यासस्य निवृत्या आनन्दावाप्तिरितिराद्धान्तः।उक्तञ्चाध्यासभाष्ये[1] अस्यानर्थहेतोःप्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते' इति। एतेन च अद्वितीयब्रह्मज्ञानस्यानर्थनिवृत्तिहेतुत्वं प्राप्तम्। 'नान्यः पन्थाः विद्यातेऽयनाय[2]' इति च शास्त्रम्। समुदेतीह कश्चित् संशयः कर्मोपासनादीनां तर्हि क्वोपयोग इति। यतश्च अनाद्यविद्याग्रस्ताः जीवाःसर्वे जन्ममरणादिक्लेशकलुषितादस्मात् संसारात् अपुनावृत्तिरूपं मोक्षफलं कामयमानाः कर्मोपासनादिषु श्रद्धावन्तो दृश्यन्ते। नात्र कर्मोपासनादीनां अप्रामाण्यमाशङ्कनीयं सहस्रशः श्रुत्युपलब्धेः[3] :। तथा चोच्यते शास्त्रप्रामाणिकै : यत् कर्मपरा अशीतिसहस्रमन्त्रा उपलभ्यन्ते, पोटशसहस्रमन्त्रा उपासनापराश्चेति।

आश्चर्यमिदं मुक्तिहेतुभूतज्ञानपराः मंत्रास्तावत् चतुस्सहस्रपरिमिता इति। अतश्च चिन्तनीयं यत् कर्मोपासनादिकं मानवानां कृते अत्यन्तमनुपयोगि उत नेति। अपि च तेषां मोक्षोपयोगित्वमस्ति न वेति। ज्ञानादेव तु कैवल्यमिति[4] वचनानुसारं ज्ञानमात्रं हि मोक्षकारणमिति ज्ञायते। ज्ञानञ्च तत् कारणान्तरं विना किं स्वत उत्पद्यतेति जिज्ञासायां कर्माद्युपायान्तराणां प्रसक्तिर्भवति। तत्र शङ्कराचार्यवचनं तां शमयति यत् मोक्षसाधनसामग्रीषु भक्तिरेव गरीयसीति[5]। मोक्षस्य साक्षात् साधनं ज्ञानं, ततत्साधनसामग्र्यः भवन्ति भक्तिः, कर्म, उपासना इत्यादिकमिति तात्पर्यम्।

कर्मणः बन्धहेतुत्वात् मोक्षसाधनज्ञानसामग्रीषु तत्प्रवेशः कथं स्यादिति भवेच्छङ्का। कर्मणा बध्येते विद्यया मुच्यतेति खलु वचनम्। किन्तु मोक्षसाधकं ज्ञानं न शुद्धब्रह्मणः अपि तु विशिष्टस्यैव। अखण्डाकारवृत्तिविशिष्टं चैतन्यमित्यर्थः। द्वितीयसूत्रव्याख्यानावसरे भाष्यकारेण अनुभवोऽपि यथासम्भवमिह प्रमाणमित्यत्र अनुभवशब्दः अखण्डाकारवृत्तिपर इति भामतीकारेण[6] व्याख्यातमपि। सा च वृत्तिः तत्त्वमस्यादिमहावाक्यजन्या भवति। तथाचोक्तं वार्तिककृद्भिः-

तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः।
अविद्यासहकार्येण नासीदस्ति भविष्यति। इति[7]।।

तत्त्वमस्यादिमहावाक्यानां तात्पर्यं गृहीतुं अशक्तो भवति कश्चित् सामान्यस्साधक : । यतश्च चित्तकल्मषः विद्याप्राप्तिप्रतिबन्धको भवति। अतः विद्यावाप्तये रागादिकल्मषनिवृत्तिद्वारा चित्तशुद्धिं सम्पादयेत्। चित्तशुद्धिसम्पादने कर्मणामुपयोगः तदेकाग्रतायै उपासानानाञ्च। तदुक्तं सदानन्दयोगीन्द्रेण-'एतेषां नित्यादीनां बुद्धिशुद्धिःपरमं प्रयोजन' मिति। नित्यनैमित्तिकादिकर्मणां चित्तशुद्धिः परमं प्रयोजनमिति तात्पर्यम्। कर्म सकामनिष्कामभावेन द्विधेति कारणात् कस्यानुष्ठानेन मुक्तिहेतुभूतचित्तशुद्धिरिति समुदेति जिज्ञासा। तन्नोच्यते निष्कामकर्म चित्तशुद्धये कारणं यद्यपि, तथापि सकामकर्मऽपि निष्कामभावेन क्रियते चेत् समानं फलं लभ्यते एव।

लोके अन्वेष्टव्यौ द्वावेव पदार्थौ मनः आत्मा च। आत्मज्ञानं संसारात् मोचयति मानवं, मनश्च तत्साधने प्रबलं सामग्री भवति। 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'[९] इति श्रुतिः मनसः अगोचरत्वं ब्रह्मणि ज्ञापयतीति कथं वा मनसः सामग्रीत्वमिति शङ्का स्यात्। सा च श्रुतिःमनसः फलव्याप्यत्वनिराकरणपरा[१०] नतु वृत्तिव्याप्यत्वनिराकरणपरा। मनसः फलव्याप्यत्वमेव पण्डितैः ब्रह्मणि निराक्रियते।

आत्मज्ञानाभिव्यक्तिहेतुभूतं मनः शुद्धमेव स्याद् नत्वशुद्धम्। किन्त्वनाद्यविद्याग्रस्तत्वात्, सञ्चितप्रारब्धादिकर्मबीजसंस्काराहितत्वाच्च मनः कलुषितमेव वर्तते सर्वेषाम्। इदं मनः आत्मज्ञानप्राप्तये अशक्तमेव। यतश्च 'तं त्वौपनिषदं पुरुषं पृच्छामि[११]' इत्यादिभि : श्रुतिभि : उपनिषद्वाक्यैकगोचर आत्मेति निरूप्यतेत्यतः तादृशवाक्यानां तात्पर्यज्ञानं कलुषितान्तःकरणेन केनचिदवबोद्धुं न शक्यते। अनादिकर्मवासनाकलुषितं चितं उपनिषद्वाक्यानां तात्पर्यमगृहीत्वा यत्किञ्चिज्ज्ञानं विपरीतं वा गृह्णीयात्। तच्चानर्थाय कल्पते नार्थाय परमाय। अतः मनसः स्वच्छतासम्पादनाय समस्तमपि कल्मषं दूरीकुर्यात्। तच्च विना कर्म नैव सम्भवति। अत एवोच्यते नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखलकल्मषतया नितान्तनिर्मलस्वान्तः वेदान्ते अधिकारीति।

कर्मणां न केवलं अन्तःकरणशुद्धिप्रदायकत्वं किन्तु साक्षात् मुक्तिहेतुत्वमपीति प्रत्यवतिष्ठन्ते केचन।तथा च मुक्तिलाभ : कर्मणा भवति नतु ज्ञानेनेति कर्मवादिनां तेषां वादःकथमिति जिज्ञासायामुच्यते-वेदविहितकर्मणामनुष्ठानेन तदितरस्य परित्यागेन च मोक्षः सिद्धयति। तदुक्तम्-

अकुर्वता : क्रिया : काम्या निषिद्धास्त्यजतस्तथा।
नित्यनैमित्तिकं कर्म विधिवच्चानुतिष्ठत :[१२] ।।

कर्मकरणेन तदकरणप्रयुक्त : पापरूपानर्थोऽपि नैव जायते। अतः कर्मणः मोक्षहेतुत्वात्

तदर्थं ज्ञाने प्रयत्न : विफल एव। अध्यात्माधिकारे प्रवृत्तोऽपि वेदभाग : कर्म कर्तुं चोदयति। तथाचोच्यते ईशावास्ये-

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे। इति।।[13]

कर्मोपासनयोर्फलमनित्यमिति कारणात् न ताभ्यां नित्यस्य मोक्षस्योपलब्धिरिति समाधानं ब्रूमः। तदङ्गीकारे च मोक्षस्यानित्यत्वापत्या 'न स पुनरावर्तते"[14]. इत्यादिश्रुतिव्याकोप : अपसिद्धान्तरश्च सम्भवत :। कर्मजन्यफलं नित्यमेवेति वादस्त्वस्थाने एव। तदनित्यबोधिकाया : श्रुतेर्दर्शनात्। तथा च श्रूयते 'तद्यथा कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते इति । उपासनायाः मानसरूपकर्मत्वाङ्गीकारात् तज्जन्यफलस्याप्यनित्यत्वमुक्तम्। अपि च कर्मणः पञ्चविधफलेष्वपि मोक्षः नान्तर्भवति। उत्पत्तिः, आप्तिः, विकारः, संस्कारः, नाश इत्येते कर्मफलप्रकाराः। मोक्षः नोत्पाद्यः नित्यत्वात्, नाप्यःसर्वव्यापित्वात्, न विकार्यः निर्विकारत्वात् पूर्णत्वाच्च, न संस्कार्यः शुद्धत्वात्। अतः ज्ञानमेकं मुक्त्वा गन्धमात्रेणापि कर्मणः मोक्षे अनुप्रवेशो नास्ति। ज्ञानमेकमेव मोक्षस्य साधनमुच्यते बुधैः पारदर्शिभि :। तथाचोच्यते आचार्यैः-

बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम्।
पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिद्धयति।।[15]

कर्मण : मुक्तिहेतुत्वं न स्यान्नाम उपासनया तु भवत्येवेति शङ्कामुद्भावयन्ति केचन। तेषं वादस्त्वेवम, सेतुदर्शनेन पापनाशो भवतीति मन्यन्ते केचित्। प्रत्यक्षज्ञानात्मकमिदं सेतुदर्शनं तदैव मुक्तिफलकं भवति यदा श्रद्धया भक्त्या च क्रियते। श्रद्धाभक्तिसहकृतेनैव सेतुदर्शनेन यथा भवति मुक्तिस्तथा कर्मोपासनासहकृतेन ज्ञानेनैव मुक्तिरिति स्वीकार्यमिति। तथा च कर्मोपासने ज्ञानसाधनेति सिद्धम। कर्मभिरन्तःकरणशुद्धिं सम्पाद्य उपासनया तदैकाग्रतां विधाय च ते ज्ञानसाधने भवतः। वादश्चायं साक्षान्मोक्षहेतुत्वं कर्मोपसानयोः दर्शयति। नायं वादस्समीचीन :युक्त्याभासात् दृष्टान्तदार्ष्टान्तिकवैषम्याच्च। फलं दृष्टमदृष्टमिति द्विविधम्। तत्र सेतुदर्शनेन दृष्टफलं न भवति किन्त्वदृष्टमेव। यददृष्टफलोत्पत्तौ कारणं भवति तत्सहचारिभूताः यावन्तःसामग्रीविशेषाः शास्त्रेण विधीयन्ते, तेषां सत्वे एव तस्य फलोत्पत्तये कारणत्वम्। अतः श्रद्धाभक्तिशून्यं यत् सेतुदर्शनं तत्र फलहेतुः। एवं केवलसेतुदर्शनेन पापनाशो नास्ति किञ्चित्प्रमाणमपि।

साक्षान्मोक्षहेतुत्वं तयोर्मास्तु, किन्तु परम्परया मोक्षहेतुत्वमङ्गीकरणीयमेवेति केचनान्ये। यथा वृक्षविवृद्ध्यर्थं उपयुक्तं जलं वृक्षस्थफलोत्पत्तयेऽपि परम्परया कारणं तथा कर्मोपासने

ज्ञानफलमोक्षसिद्धयै परम्परया कारणे एव। नाऽयं वादस्समीचीन:, अनुपपत्ते:। तथाच तमोनिवृत्त्यर्थं दीपप्रभा इव स्वफलोत्पत्तये ब्रह्मज्ञानं कर्मोपासने नापेक्षते। ब्रह्मविद्याफलं यत् मोक्ष:स्वर्गादिवत् अदृष्टं फलं न, अपि तु नित्य एव। बन्ध: भ्रान्त्या प्रतीयते तन्निवृत्तिरेव ब्रह्मविद्याया : फलम्। सा च निवृत्ति : ज्ञानिनां प्रत्यक्षमेव नादृष्टम्। दुष्टफलोत्पत्तौ यावन्त्य: सामग्र्य अपेक्ष्यन्ते तासां हि दृष्टफलं प्रति कारणत्वं नान्येषाम्। यथा तुरीतन्तुवेमादिभि : पट उत्पद्यते तच्च प्रत्यक्षमेवेति तुरीतन्तुवेमानामेव पटस्य कारणत्वं नान्येषाम्। यथा तुरीतन्तुवेमादिभि : पट उतपद्यते तच्च प्रत्यक्षमेवति तुरीतन्तुवेमानामेव पटस्य कारणत्वम्। एवमेव अधिष्ठानज्ञानमात्रेण भ्रान्तिनिवृत्ति रित्यनुभवात् तस्यैव तद्धेतुत्वं वक्तुं युक्तम्। अत:आत्मज्ञानस्य कर्मण:, उपासनाया अन्यस्य वा नास्ति भ्रान्तिनिवृत्तये अपेक्षा। केवलं ज्ञानमेव मोक्षसाधनम्। तथा च श्रुति : न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति अत्र ब्रह्मसमश्नुते। एवं च -

यदा चर्मवदाकाशं वेष्टयन्ति मानवा:।
तदा देवमविज्ञाय दु:खस्यान्तो भविष्यति[८]

तमेव विदित्वा अतिमुत्युमेति, तरति शोकमात्मवित्[९], ज्ञात्वा देवं मुच्यते सर्वपाशै: इत्येवम्। जलसेचनं वृक्षविवृद्धिमात्रे एव कारणं नच फलोत्पत्तये। जलसेचनेन पुष्टे वृक्षे फलमुत्पद्यते। एवमेव कर्मोपासनयो : ज्ञानोत्पत्तौ कारणत्वं युक्तं नतु तत्फलस्य मोक्षस्योत्पत्ताविति ध्रुवम्। ज्ञानोत्पत्ते: प्राक् यावदन्त:करणं पापग्रस्तमस्ति तावत् तन्निवृत्तये कर्मोपासनयो: विनियोग:। शुद्धे चित्ते ज्ञानं स्वत एवोत्पद्यते। तथा चोच्यते-

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।
योगारूढस्य तस्यैव शम:कारणमुच्यते।।[१०]
जिज्ञासायां सम्प्रवृत्तो नाद्रियेत्कर्मचोदनाम्।
चित्तस्य शुद्धये कर्म नतु वस्तूपलब्धये।
वस्तुसिद्धिर्विचारेण नान्यथा कर्मकोटिभि :।
तस्मात् कर्म न कुर्वन्ति यतय: पारदर्शिन : । इति।।[११]

ज्ञानरक्षार्थमपि न कर्मोपासनयोरपेक्षा। यतश्च भ्रान्तिनिवृत्तिहेतुभूता या अन्त: करणवृत्तिरुत्पन्ना सा कर्मोपासनयोरपेक्षां विना स्वयमेव नश्यति, अथवा चैतन्यस्वरूपे ज्ञाने लीयते। स्वरूपभूतं ज्ञानं नित्यमेवेति नान्येन केनचिदुत्पाद्यं रक्ष्यं वा भवति। किन्तु वृत्तिज्ञानोदयाय कर्मोपासनयोरपेक्षाऽस्ति। तेन च कर्मोपासनयोर भावे तज्ज्ञानमपि नश्यतीत्ययं पक्षोऽप्ययुक्त एव। यतश्च सकृदुत्पन्ना ब्रह्माकारान्त:करणवृत्ति: तत्काले एव अज्ञानं निवर्तयति।

अज्ञाननाशानन्तरन्तु तन्नाशकवृत्तिरक्षणस्यापेक्षा नास्ति। अतः नात्र कर्मोपासनयो : विनियोग :, भ्रान्तिनिवृत्तिहेतुभूता सा कर्मोपासनयो : विरोधिनी अपि भवतीति न ज्ञानरक्षणाय तयोर्विनियोग इति स्पष्टम्।

अन्तः करणशुद्धिमात्रमभिलक्ष्य हि कर्मोपासनयोर्विनियोग : नत्वितरथा। ज्ञानिनां पापादि दोषसंसर्गहेतुभूताऽविद्याविनाशात् पुनस्तेषाम् अन्तःकरणे संसर्गः न सम्भवति, तद्दूरीकरणार्थमपि न कर्मोपासनयोरपेक्षा। ज्ञानिनां मनश्चाञ्चल्यं वेदान्तार्थविचारेण विनश्यतीति कारणात् मनसः नैश्चैल्यसम्पादनार्थमपि[२२] उपासनायाः प्रवृत्तिर्नास्ति। वेदविहितमननिदिध्यासनेषु ज्ञानिनां प्रवृत्तिरस्ति, सा च प्रवृत्ति : कर्तव्यबुद्ध्या क्रियतेति कर्मस्पर्शः भवेदिति शङ्का न कार्या। यतश्च ज्ञानिनां मननादिषु प्रवृत्ति : विधिना नास्ति अपि तु स्वेच्छयैव । तथाचोच्यते -

श्रुण्वन्त्वज्ञाततत्वास्ते जानन् कस्माच्छृणोम्यहम्।
मन्यन्तां संशयापन्ना न मन्येऽहमसंशय;।।
विपर्यस्तो निदिध्यासेत् किं ध्यानमविपर्ययात्।
देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहम्। इति।।

शुद्धान्तःकरणोन ज्ञानोदयाय श्रवणादिषु प्रवृत्तिः कार्या नतु कर्मोपासनादिषु। यस्य तु भोगे इच्छा ज्ञाने नहि तस्य निष्कामकर्मणि प्रवृत्तिः, यस्य तु वेदान्तश्रवणे प्रवृत्तिः तस्य कर्मानुष्ठानं जन्मान्तरभोगार्थमेव। देहश्च नश्यतीति जन्मान्तरभोगाय देह : न समर्थ । तेन च देहातिरिक्तात्माऽस्तीति ज्ञानं हि कर्मण : कारणं, एवं देहातिरिक्त आत्मा कर्ता भोक्ता चेत्यपि। पुण्यपापयोः कर्ताहमित्यभिमानेन शुभाशुभकर्मफलं मे भूयादिति विलसितधीर्यस्मिन् तस्यास्ति प्रवृत्तिर्कर्मणि न ज्ञानिनां, सः तु नेत्थम् आत्मानं प्रतिजानाति, किन्तु पुण्यपापादिशून्यं ब्रह्मस्वरूपं ह्यात्मा। वेदान्तजन्यमिदं ज्ञानं कर्मकारणं न, अपि तु विरोध्येव। अविद्यानाशपूर्वकसंसार-निवृत्तिरेव मोक्ष इति कारणात् तन्निवृत्त्युपायस्तत्र परिचिन्त्य एव। तत्र बाध्यबाधकभावः विरुद्धयोरेव सम्भवतीति क्लृप्तन्यायात् अविद्यानिवृत्तये कर्मणस्तत्र नास्ति प्रवेश अविरुद्धत्वात्, विरोधस्तु विद्याविद्ययोरेव। तथाचोक्तम् आत्मबोधे -

अविरोधितया कर्म नाविद्यां विनिवर्तयेत्।

विद्याऽविद्यां निहन्त्येव तेजस्तिमिरसङ्घवत्[२३]।। 'तत्प्राप्तिहेतुर्विज्ञानं कर्मचोक्तं महामुने'[२४] इत्यादिप्रमाणबलेन ज्ञानकर्मसमुच्चयस्यापि मोक्षसाधनत्वं मन्यन्ते केचित्। समुच्चयश्च द्विधा -समसमुच्चयः क्रमसमुच्चयश्च। तत्र शिरोधार्यात् समासमुच्चयं परित्यज्य क्रमसमुच्चयमभ्युपगच्छामः तच्च प्राक् निरूपितमपि, पूर्वपक्ष्युदाहृता स्मृतिस्तु

क्रमसमुच्चयपरेति न दोषः। एवञ्च "पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिद्ध्यति" एवं "तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथाऽमृतस्यैष सेतुः " "ऋते ज्ञानान्न मुक्ति" इत्यादि श्रुतिमूलकवचनशतैः श्रुतिशतैश्च साक्षन्मोक्षहेतुत्वं ब्रह्मज्ञाने एव सम्बोध्यतेति सिद्ध्यति।।

पादटिप्पणी

१. ब्र.शा.भा.१११
२. श्वे. उप.. ३.८
३. तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा अनाशकेन (बृ.उप-४.४.२२)। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते (ई.उप-२२) ओमित्येवं ध्यायथात्मानं, आत्मानमेव लोकमुपासीत।
४. स.वे.सि.पृ.२००
५. वि.चू.३२
६. अनुभव : अन्तःकरणवृत्तिभेद :, (ब्रह्म. शां. भा. वे.. परि. २.२.पृ.८९)
७. बृ.भा.वा.४.४.४१७
८. वे.सा.अधि.
९. तै.उप.२.१
१०. स्वप्रकाशोपि साक्ष्येव धीवृत्या व्याप्यतेऽन्यवत्।
फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् (प.द.७.१०)
११. बृ.उप. ३.१.२३
१२. नै.सि.१.१०
१३. ई.उप.१.२.
१४. छा. उप... ८.५
१५. छा.उ.८. १.६
१६. आ.बो.१
१७. बृ. उप. ४.४.१६६
१८. श्वे.उप. ६.२०
१९. छा.उप. ७.३.१.
२०. भ.गी. ६.२.
२१. वि..चू.११
२२. विपरीतभावनेयं ऐकाग्र्यात् सा निवर्तते।

तत्त्वोपदेशत् प्रागेव भवत्येतदुपासनात्।। ((प..द.७.१०)

२३. आ.बो.३

२४. वि.पु.-६.५.६०

सङ्केताक्षरसूची

१. श्वे.उप. श्वैताश्वतरोपनिषत्।

२. ब्र.शा.भा. ब्रह्मसूत्रशाङ्करभाष्यम्।

३. स.वे..सि.-सर्ववेदान्तसिद्धान्तसारसङ्ग्रह।

४. वि.चू. विवकेचूडामणि।

५. ब्रह्मा.शां.भा.वे.परि-ब्रह्मासूत्रशाङ्कर भाष्यं, भामती-वेदान्तकल्पतरु-कल्पतरुपरिमलोप-बृंहितम्।पृ-पृष्ठसङख्या।

६. बृ.भा.वा. बृहदारण्यकभाष्यवार्तिकम्।

७. वे.सा.अधि-वेदान्तसारस्य अधिकारिविचार।

८. तै.उप. तैत्तिरीयोपनिषत्।

९. प.द.-पञ्चदशी

१०. बृ.उप. -बृहदारण्यकोपनिषत्।

११. नै.सि.-नैष्कर्म्यसिद्धि :।

१२. ई.उ. ईशावास्योपनिषत्।

१३. छा.उप.छान्दोग्योपनिषत्।

१४. आ.बो.आत्मबोधः।

१५. श्वे-श्वेताश्वतरोपनिषत्।

१६. भ.गी- भगवद्गीता।

१७. वि.पु - विष्णुपुराणम्।

अनुशीलितग्रन्थसूची

१. वेदान्तत्वविचारः-स्वामि हरिहरानन्दसरस्वति - चौखम्बा अमरभारती

२. प्रश्नोत्तरदीपमाला-स्वामि रामानन्दजि सरस्वति - मार्कण्डेयसंन्यासाश्रम, ओङ्कारेश्वर-२०१०

३. ब्रह्मसूत्रशाङ्करभाष्यम् चौखम्बासंस्कृतसंस्थान्-वारणासि - २००४

४. विवेकचूडामणि : शङ्कराचार्य : गीताप्रेस् - गरखपूर

५. अद्वैतसिद्धि : - मधुसूदनसरस्वति-रत्ना पब्लिक्केपन्स्-वारणासि - Vol-1-2010
६. वेदान्तसारः सदानन्दयोगीन्द्र : चौखम्बाविद्याभवन् - २००४
७. तैत्तिरीयोपनिषत्-गीताप्रेस्-गोरखपूर्
८. ब्रह्मसूत्रशाङ्करभाष्यं - वेदान्तकल्पतरु-कल्पतरुपरिमलोपबृंहितम्-
कृष्णदास अकादमी - वारणासी - २०००
९. छान्दोग्योपनिषत् गीताप्रेस्-गोरखपूर
१०. बृहदारण्यकोपनिषत् - गीताप्रेस् – गोरखपूर
११. श्वेताश्वतरोपनिषत् - गीताप्रेस्-गोरखपूर
१२. भगवद्गीता-गीताप्रेस् -गोरखपूर
१३. पच्चदशी-विद्यारण्यमुनि : उत्तरप्रदेशसंस्कृतसंस्थान् - लक्नौ - १९९७
१४. नैष्कर्म्यसिद्धि : सुरेश्वराचार्य : - श्रीदक्षिणामूर्तिमठम्-वाराणसि -१ ९९६
१५. ईशावास्योपनिषत्-गीताप्रेस्-गोरखपूर
१६.. सर्ववेदान्तसिद्धान्तसारसङ्ग्रहः श्यमासुन्दर्झा - चौखम्बासंस्कृतसीरीस् ओफीस्-
वाराणसि - २००६.